प्रत्यासत्तिरस्ति, तथाच क्वचित् समवायसम्बन्धेन, क्वचित् स्वसमवायिसमवायसम्बन्धेनेति फलितार्थः । द्रव्यस्य कार्य्ये कार्य्यकारणैकार्थान्यतरप्रत्यासत्त्या कारण ज्ञानादिभिन्नमसमवायिकारणमिति सामान्यलक्षणं पर्य्यवसन्नम्” ।

कुत्र कुत्र किंकिमसमवायिकारणं? वैशेषिकसूत्रे तदुक्तं तत उद्धृत्य किञ्चित् प्रदर्श्यते ।

“आत्मसंयोगप्रयत्नाभ्यां हस्तेकर्म्म१ । तथा हस्तसंयोगाच्च मुषले कर्म्म२ । अभिघातजे मुषलादौ कर्म्मणि व्यतिरेकादकारणं हस्तसंयोगः३ । तथात्मसंयोगो हस्तकर्म्मणि४ । अभिघातान्मुषलसंयोगाद्धस्ते कर्म्म५। आत्मकर्म्म हस्तसंयोगाच्च ६ ! संयोगाभावे गुरुत्वात् पतनम्७। नोदनविशेषाभावान्नोर्द्ध्वं न तिर्य्यग्गमनम्८ । प्रयत्नविशेषान्नोदनविशेषः९ । नोदनविशेषादुदसनविशेषः१० । हस्तकर्म्मणा दारकर्म्म व्याख्यातम्११ । तथा दग्धस्य विस्फोटने१२ । यत्नाभावे प्रसुप्तस्य चलनम्१३ । तृणे कर्म्म वायुसंयोगात्१४ । मणिगमनं सूच्यभिसर्पणमदृष्टकारणम्१५ इषावयुगपत्संयोगविशेषाः कर्म्मान्यत्वे हेतुः १६ । नोदनादाद्यमिषोः कर्म्म तत्कर्म्मकारिताच्च संस्कारादुत्तरं तथोत्तरमुत्तरञ्च१७ संस्काराभावे गुरुत्वात् पतनम्” १८ वै०सू० “संयोगश्च प्रयत्नश्च संयोगप्रयत्नौ आत्मनः संयोगप्रयत्नौ ताभ्यां हस्ते समवायिकारणे कर्म्म, तस्य च कर्म्मणः प्रयत्नवदात्मसंयोगोऽसमवायिकारणम्, प्रयत्नश्च निमित्तकारणम्, इयमेव चेष्टा, प्रयत्नवदात्मसंयोगासमवायिकारणकक्रियायाश्चेष्टात्वात् स्वासमवेतस्वातिरिक्तस्पर्शवदन्यप्रयत्नजन्यक्रियाया वा१ । तथा हस्तसंयोगादुत्क्षेपणवद्धस्तसंयोगादित्यर्थः अत्र च यत्नवदात्मसंयुक्तेन हस्तेन मुषलस्य संयोगोऽसमवायिकारणम्, मुसलं समवायिकारणम्, प्रयत्नगुरुत्वे निमित्तकारणे २। उदूखलाभिहतमुषलस्याकस्मात् यदुत्पतनं जायते तत्र कारणमाह । तत्र यद्यपि मुसलेन उत्पतता हस्तस्य संयोगोऽप्यस्ति तथाऽपि स संयोगोऽन्यथासिद्धः किन्तु उदूखलाभिघात एव असमवायिकारणम्, कुत एवमित्यत आह व्यतिरेकादिति प्रयत्नस्य व्यभिचारादित्यर्थः । यदि तदा प्रयत्नः स्यात् मुषलस्यैवाकस्मिकमुत्पतनं न भवेत् विधारकेण प्रयत्नेन मुषलस्य धारणमेव भवेत् चेष्टाधीनं मुषलस्य पुनरुत्पतनं वा भवेत् इति भावः३ । मुषलेन सहोत्पततोहस्तस्य कर्म्मणि कारणविशेषमभिधातुं प्रयत्नवदात्मसंयोगस्यासमवायिकारणत्वं निराकर्त्तुमाह । मुषलेन सहोत्पततोहस्तस्य कर्म्मणि आत्मसंयोगः प्रयत्नवदात्मयोगस्तथा अकारणमित्यर्थः अकारणमिति पूर्व्वसूत्रस्थं तथेत्यतिदिश्यते४ । कुतस्तर्हि हस्ते तदोत्पतनमत आह । यथा मुषले उत्पतति मुषलमुखस्थं लोहमुत्पतति तथा हस्तोऽपि तदोत्पतति । अत्राभिघातशब्देन अभिघातजनितः संस्कार उच्यते उपचारात्, उत्पततो मुषलस्य पटुतरेण कर्म्मणा अभिघातसहकृतेन स्वाश्रये मुषले संस्कारोजनितस्तत्कृतं संस्कारमपेक्ष्य हस्तमुषलसंयोगादसमवायिकारणाद्धस्तेऽप्युत्पतनं न तु तदुत्पतनं प्रयत्नवदात्मसंयोगासमवायिकारणकम्, अवशो हि हस्तो मुषलेन सहोत्पततीति भावः५ । ननु शरीरे शरीरावयवे वा यत्कर्म्मोत्पद्यते तत्र प्रयत्नवदात्मसंयोगः कारणं प्रकृते कथं न तथेत्यत आह । आत्मशब्दः शरीरावयवपर उपचारात् अन्वयानुपपत्तिरेवोपचारवीजम् । तथाचात्मनः शरीरावयवस्यापि हस्तस्य यत् कर्म तत् हस्तमुषलसंयोगात् चकाराच्च वेगसमुच्चयः, हस्तकर्म्मणि हस्तसंयोगस्तावदसमवायिकारणं तत्र व्यभिचारो नास्ति स च क्वचित् प्रयत्नवदात्मसंयोगः क्वचिद्वेगवन्मुषलादिसंयोगो यथा वातूलस्य शरीरावयवकर्म्मेति भावः ६ ॥ प्रयत्नानधीनकर्म्मप्रकरणमारभते । संयोगपदेन प्रतिबन्धकमात्रमुपलक्षयति तेन प्रतिबन्धकाभावे गुरुत्वादसमवायिकारणात् पतनम् अधःसंयोगफलिका क्रिया जायते, तत्र गुरुत्ववति फलादौ प्रतिबन्धकः संयोगः, विहङ्गमादौ तु विधारकः प्रयत्नः पतनप्रतिबन्धकः, एतेषामभावे गुरुत्वाधीनं पतनमित्यर्थः । अभिध्यानादिना विषादेरन्तरीक्षस्थापने अदृष्टवदात्मसंयोगो मन्त्रादिरेव वा प्रतिबन्धकस्तेषामपि संयोगपदेन संग्रहः७ ॥ ननु गुरुत्वाद् यदि पतनं तदा लोष्टादेरुत्क्षिप्तस्य क्वचिदूर्द्ध्वं क्वचिच्च तिर्य्यग्गमनं कथम्भवेदित्यत आह । गुरुत्ववतोऽपि लोष्टकाण्डादेर्यदूर्द्ध्वं तिर्य्यक् च गमनं तन्नोदनविशेषात् तीव्रतरान्नोदनात् । तथाच फलपक्षिवाणादौ संयोगप्रयत्नसंस्काराभावे यत् पतनं तत्र नोदनविशेषो नास्ति तेन न तिर्य्यक्,नचोर्द्ध्वं गमनमिति भावः८ । ननु नोदनविशेष एव कुत उत्पद्यते तत्राह । तिर्य्यक् ऊर्द्ध्वं दूरम् आसन्नं वा क्षिपामीति-इच्छाकारणकः प्रयत्नविशेषः तज्जनितो नोदनविशेषस्ततो गुरुत्ववतो द्रव्यस्य लोष्टादेरूर्द्ध्वं तिर्य्यक् च गमनमुपपद्यते उदसनं दूरोत्क्षेपणम् ९,१०॥ उदूखलाभिघातात् मुषलेन सह हस्ते यत्कर्म्म उत्पन्नं तत्तावत् प्रयत्नपूर्व्वकं न भवति नापि पुण्यपापहेतुकमतस्तत्तुल्यतया बालकस्य क्रीड़ाकरचर-